# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्री द्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ७ | |
|---|---|---|
| विषयः - वेदः | (C.E.-2.3.3.New) | गुणाः - ७० |
| दिनाङ्कः - ११/१२/२०१८ | ग्रन्थः याज्ञवल्क्यशिक्षा | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधस्तनेषु श्लोकेषु द्वयोः ग्रन्थोक्तदिशा व्याख्यायताम् ।** **( १० )**

(१) गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः ।
त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥

(२) प्रणवं प्राक् प्रयुञ्जीतव्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥

(३) अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद्वृतिं विलम्बिताम् ॥

**प्रश्नः २ द्वयोरेकस्य निबन्धात्मकं वर्णनं कुरुत ।** **( १० )**

(१) स्वराणाम् उदात्तादीनां देवताजातिगोत्रान् वर्णयत ।

(२) वर्णोच्चारणे मुखहस्तयोः सामञ्जस्यम् उल्लिख्य हस्तहीनवेदपाठेन किं फलं वर्णनं कुरुत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ प्रदत्तेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** **( १० )**

(१) उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः ।
हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिरीरितः ॥

(२) विसर्गान्तः स्वरो हस्वः स्वरितो यत्र दृश्यते ।
दीर्घस्तु सवकारश्च ततोभक्षेप उच्यते ॥

(३) उच्चानुदात्तयोर्योगे स्वरितः स्वर उच्यते ।
ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽद्भुतः ॥

**प्रश्नः ४ द्वयोरेकस्य सविस्तरं वर्णयत ।** **( १० )**

(१) याज्ञवल्क्यशिक्षानुसारेण हस्तसञ्चालनविधेः वर्णनं सविस्तरं कुरुत ।

(२) ग्रन्थानुसारेण स्वरसंहिताविधिम् उपस्थापयत ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु श्लोकेषु द्वयोः व्याख्या विधेया ।** **( १० )**

(१) शुक्लवर्णानि नामानि आख्याता रोहिता मताः ।
कपिलास्तूपसर्गाश्च कृष्णाश्चैव निपातका : ॥

(२) एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ।
सम्यक्पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥

(३) प्रथमा यत्र दृश्यन्ते सन्धिस्थानेषु पूर्वतः ।
स्ववर्गीयेण संयुक्ता मोक्षं तत्र न कारयेत् ॥

**प्रश्नः ६** याज्ञवल्क्यशिक्षानुसारेण स्वरभक्तेः सन्दर्भे निबन्धो लेख्यः । **( १० )**

अथवा

ग्रन्थोक्तदिशा स्वरव्यञ्जनवर्णानां विषये सारांशात्मकं वर्णनं कुरुत ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधस्तनेषु केषाञ्चन दशप्रश्नानां लघूत्तरं लिखत ।** **( १० )**

(१) अनुदात्तस्य वर्णः कः ?

(२) उदात्तस्य कः गोत्रः ?

(३) गान्धर्ववेदे षड्जादयः कति स्वराः सन्ति ?

(४) गान्धारं के रम्भन्ति ?

(५) अवग्रहे मात्राकालः कः ?

(६) प्रणवोच्चारणे किं कुर्याद् ?

(७) कः वेदफलं न अश्नुते ?

(८) मध्यमां वृतिं कुत्र कुर्यात् ?

(९) हस्तप्रदर्शने तकारे का आकृतिः ?

(१०) ऊष्मा कति विधाः काश्च ताः ?

(११) कतिविधाः स्वरितः ?

(१२) अचां (स्वराणां) जातिः का ?

(१३) कति विवृत्तयः ?

(१४) स्वरभक्तयः कति विधाः ?

(१५) केन वेदेन सह याज्ञवल्क्यशिक्षायाः सम्बन्धोऽस्ति?

--००--